अभ्यासप्रश्नपत्रम्-1

PRACTICE PAPER-1

2018-2019

Class- X　　　　　　　　　　　　　　Subject- Sanskrit

Time- 3 Hours　　　　　　　　　　　　Max. Marks.- 80

| Q. No | Description | M.M |
|---|---|---|
| | सामान्य–निर्देशाः–<br>● कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 16 प्रश्नाः सन्ति।<br>● अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति । अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।<br>● प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।<br>● उत्तरलेखनात् पूर्वं प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।<br>● सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।<br>● प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।<br>**प्रश्नपत्रस्वरूपम् -**<br>अस्मिन् प्रश्नपत्रे चत्वारः खण्डाःसन्ति ।<br>खण्ड– 'क' अपठित–अवबोधनम् 10 अङ्काः<br>खण्ड– 'ख' रचनात्मक–कार्यम् 15 अङ्काः<br>खण्ड– 'ग' अनुप्रयुक्त–व्याकरणम् 25 अङ्काः<br>खण्ड– 'घ' पठित–अवबोधनम् 30 अङ्काः | |
| 1. | खण्ड– 'क'<br>अपठित–अवबोधनम् (10 अङ्काः)<br>अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत–<br>भारतस्य स्वतन्त्रता-आन्दोलने अनेकेषाम् महापुरुषानां योगदानं आसीत् तेषु महात्मा गांधी अन्यतमः आसीत्। सः भारताय अजीवत् भारताय एव च प्राणान् अत्यजत्। तस्य पूर्णं नाम मोहनदासकरमचन्दगान्धी इति आसीत्। तस्य जन्म 1869 तमे ख्रीस्टाब्दे अक्टूबरमासस्य 2 दिनाङ्के पोरबन्दरनाम्नि स्थाने अभवत्। तस्य पिता करमचन्दगान्धी माता च पुतलीबाई आसीत्। तस्य पत्नी कस्तूरबा धार्मिका पतिव्रतानारी च आसीत्। मोहनदासः बाल्यकालादेव एकः सरलः बालकः आसीत्। सः सर्वदा सत्यम् वदति स्म। सः युवावस्थायाम् उच्चशिक्षायैः आंग्लदेशमगच्छत्। सः विदेशगमनसमये मातुः आज्ञया | |

| | | |
|---|---|---|
| | संकल्पितवान् यत् अहम् मद्यं न सेविष्ये, मांसस्पर्शमपि न करिष्यामि एवं सदा ब्रह्मचर्यम् आचरिष्यामि। स्वदेशमागत्य सः देशस्य सेवायाम् संलग्नः जातः। अस्य ईश्वरे दृढः विश्वासः आसीत्। सः आंग्लशासकानां विरोधे सत्याग्रहान्दोलनम् प्रवर्तितवान् । तस्य सत्ये अहिंसायाम् च महती श्रद्धा आसीत्। | |
| | अ. एकपदेन उत्तरत– (केवलं प्रश्नचतुष्टयम्)<br>i. महात्मागांधिनः कस्मिन् दृढः विश्वासः आसीत्?<br>ii. महात्मागांधिनः पितुः नाम किं आसीत्?<br>iii. महात्मा गांधी केषाम् विरोधे सत्याग्रहान्दोलनम् प्रवर्तितवान् ?<br>iv. मोहनदासस्य जन्म कुत्र अभवत्?<br>v. कः भारताय अजीवत् ? | 1/2 x4=2 |
| | ब. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्)<br>i. महात्मा गांधी विदेशगमनसमये मातुः आज्ञयाकिं संकल्पितवान् ?<br>ii. मोहनदासः बाल्यकालादेव कीदृशः बालकः आसीत्?<br>iii. महात्मागांधिनःपत्नी कीदृशी आसीत्? | 1 x2=2 |
| | स. यथानिर्देशम् उत्तरत– (केवलं प्रश्नचतुष्टयम्)<br>i. 'मोहनदासः बाल्यकालादेव एकः सरलः बालकः आसीत्।' अस्मिन् वाक्ये कर्तृपदं किम्?<br>(क) मोहनदासः (ख) बाल्यकालात् (ग) सरलः<br>ii. 'रतः' अस्य पदस्य पर्यायपदं अनुच्छेदे किं प्रयुक्तम्?<br>(क) श्रद्धा (ख) जातः (ग) संलग्नः<br>iii. 'कठिनः' अस्य पदस्य विलोमपदं अनुच्छेदे किं प्रयुक्तम्?<br>(क) सरलः (ख) संलग्नः (ग) विश्वासः<br>iv. 'अनेकेषाम् महापुरुषानाम्' अनयोः पदयोः विशेषणपदं किम्?<br>(क) आन्दोलने (ख) महापुरुषानाम् (ग) अनेकेषाम्<br>v. 'भारताय एव च प्राणान् अत्यजत्।' अस्मिन् वाक्ये क्रियापदं किम्?<br>(क)अजीवत् (ख) अत्यजत्।(ग) प्राणान् | 1 x4=4 |
| | द. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। | 2 x1=2 |

| | | |
|---|---|---|
| 2. | खण्ड– 'ख'<br>रचनात्मक–कार्यम् 15 अङ्काः<br>भवान् दिनेशः अस्ति। भवान् स्वमित्रं प्रकाशं भगिन्याः विवाहे निमन्त्रणम् दातुम् लिखिते पत्रे मंजूषातः रिक्तस्थानानि पूरयित्वा पत्रं पुनः उत्तरपुस्तिकायां लिखतु।<br>परीक्षाभवनतः<br>दिनांकः ...............<br><br>प्रियमित्र प्रकाश !<br>(i)..................नमस्कारः,।<br>अत्र (ii)............कुशलं तत्रापि (iii).............स्यात् इति वाञ्छामि। प्रियवर, इदं ज्ञात्वा त्वम् अतीव (iv).......... भविष्यति यत् मम भगिन्याः (v)..........अस्मिन् वर्षे फरवरीमासस्य दशदिनाङ्के निश्चितः कृतः । तस्मिन् एव दिवसे नोएडातः वरयात्रा (vi)............प्रति बसयानेन आगमिष्यति। अस्मिन् (vii)..........अवसरे त्वया त्रीणि दिनानि पूर्वमेव आगत्य (viii)............ करणीयः इति मम कामना वर्तते। अस्मिन् माङ्गलिके (ix)...........अस्माकं सर्वे परिचिताः कुटुम्बिनः मित्राणि च आगमिष्यन्ति। भवतः प्रतीक्षारतः अस्मि ।<br>तव अभिन्नः सुहृद्<br>(x)..................<br><br>मंजूषा<br>सहयोगः, प्रसन्नः ,सस्नेहं, दिनेशः, माङ्गलिके, दिल्लीम्, कुशलं, विवाहः, अवसरे, सर्वं | 1/2 x10=5 |
| 3. | अधः प्रदत्तं चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लेखनीयानि– | 2 x5=10 |

4.



मंजूषा–

जनाः सैनिकाः, महिला, पर्णकुटीरे, अश्वः, पर्वतः, वार्तालापं जनाः, कुर्वन्ति, उपविष्टः, कार्यम्, तिष्ठति, युद्धाय, गच्छन्ति, करोति, अस्ति

अथवा

मंजूषा–प्रदत्तशब्दानां साहाय्येन '' पुस्तकालयस्य महत्वम्'' इति विषयम् अधिकृत्य पञ्च–संस्कृतवाक्येषु एकम् अनुच्छेदं लिखत। (केवलं दृष्टिबाधितानां कृते)

मंजूषा–

समाजे, पुस्तकानि, महत्त्वं, जनाः, मनसा, आगच्छन्ति, ग्रन्थाः, ज्ञानवर्धनाय, अध्ययनम्, छात्राः, विषयाणाम्, विद्यालये, पुस्तकालयः, स्थातव्यम्, पठन्ति, समाचारपत्रम्, वर्धते, ज्ञानम्

खण्ड– 'ग'

अनुप्रयुक्त–व्याकरणम् (25 अङ्काः)

4. अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत– (केवलं प्रश्नचतुष्टयम्) 1 x4=4

i. सदा+एव सत्यं वक्तव्यम्।

ii. **गणेशः** पुस्तकं पाठयति।

iii. अस्य श्लोकस्य **पद+छेदं** कुरु।

iv. **कश्चित्** छात्रः विद्यालयं गच्छति।

v. **मृगाश्चरन्ति**। ।

| | | |
|---|---|---|
| 5. | अधोलिखितवाक्येषु रेखांकितपदानां समासं समास–विग्रहं वा प्रदत्त–विकल्पेभ्यः चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्)<br><br>i. **पिककाकौ** कूजतः।<br>(क) पिकश्च काकश्च (ख) पिकः काकः (ग) पिकं च काकं च<br><br>ii. पितृभक्तः पितरं नमति।<br>(क) पितुः भक्तः (ख) पित्रे भक्तः (ग) पितरम् भक्तम्<br><br>iii. **दश आननानि यस्य सः** युद्धं करोति।<br>(क) दशाननम् (ख) दशाननः (ग) दशानि आननानि<br><br>iv. मोहनः **दिनं दिनं**गीतां पठति।<br>(क) आदिनम् (ख) प्रतिदिनम् (ग) दिने–दिने<br><br>vi. राज्ञः पुरुषः राजमार्गे चलति।<br>(क) राजापुरुषः (ख) राजपुरुषः (ग) राज्ञः पुरुषः | 1 x4=4 |
| 6. | अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति–प्रत्ययं संयोज्य विभज्य वा उचितं उत्तरं विकल्पेभ्यः चित्वा लिखत –(केवलं प्रश्नचतुष्टयम्)<br><br>i. त्वया विद्यालयः **गन्तव्यः**।<br>(क) गम्+क्त (ख) गम्+ तव्यत् (ग) गम्+शतृ<br>ii. बालः स्नेहेन **पाल+अनीयर्।**<br>(क) पालनीयः (ख) पालनीया (ग) पालनीय<br>iii. शनैः **वर्ध+शानच्** सः वैभवं प्राप्नोति।<br>(क) वर्धमानः (ख) वर्धमानाः (ग) वर्धमानम्<br>iv. श्यामस्य पिता **धार्मिकः** अस्ति।<br>(क) धर्म+ ठक् (ख) धर्म +मतुप् (ग) धर्म + इनि<br>v. नदीतटस्य **मनोहारिन्+ङीप्** शोभा दृश्यते।<br>(क) मनोहारिणी (ख) मनोहारिणि (ग) मनोहारिण | 1 x4=4 |
| 7. | मंजूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत–<br>रामः: – त्वं किं पश्यसि?<br>छात्रः – मया (i).................दृश्यते।<br>रामः – किं त्वं ग्रन्थस्य सर्वान् पाठान् सम्यक् पठसि? | 1 x3=3 |

| | | |
|---|---|---|
| | छात्रः – आम् (ii)................... तु सर्वे पाठाः सम्यक् पठ्यन्ते ।<br>शिक्षकः – किं त्वं पाठस्य कण्ठस्थीकरणम् अपि करोति?<br>पुत्रः – आम्! मया पाठस्य कण्ठस्थीकरणं अपि (iii)................ ।<br>मया, क्रियते, ग्रन्थः<br>अथवा<br>अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत–<br>(क) लता रोटिकां पचति।<br>(ख) बालकेन ग्रन्थः पठ्यते।<br>(ग) लेखकः लेखं लिखति। | |
| 8. | कालबोधकशब्दैः प्रधानाचार्यस्य प्रस्थानसमारोहस्य समयसारणीं पूरयत– (केवलं प्रश्नचतुष्टयम्)<br>I. सायं 4:45 ....................वादने दीपप्रज्वालेन कार्यक्रमस्य आरम्भः।<br>II. सायं 5:00 ....................वादने स्वागतभाषणम्।<br>III. 5:15.................... छात्राणां नाट्याभिनयः।<br>IV. 5:30......................वादने शिक्षकाणाम् प्रस्तुति।<br>V. 6:00.............. वादने कार्यक्रमस्य समाप्तिः। | 1/2 x4=2 |
| 9. | मंजूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत– (केवलं प्रश्नचतुष्टयम्)<br>मंजूषा<br>यदा, बहिः, कुत्र, ह्यः, उच्चैः<br>i. उद्याने बालकाः .......................हसन्ति।<br>ii. भो बालकाः ! यूयम् ...................... गच्छथ?<br>iii. पुत्रि! त्वं रात्रौ गृहात् ................ मा गच्छ।<br>iv. ........... सूर्य उदेति तदा तमः नश्यति।<br>v. .................सः नगरात् आगच्छत्। | 1 x4=4 |
| 10. | अधोलिखितवाक्येषु रेखांकितपदम् अशुद्धम् अस्ति। अशुद्धं पदं संशोध्य पुनः लिखत–(केवलं प्रश्नचतुष्टयम्)<br>i. जन्तुशालायां अनेके **सिंहः** आसन्<br>ii. एतत् दृष्ट्वा बालकाः **प्रसन्नम्** अभवन् ।<br>iii. विवेकानन्दः वेदान्तस्य प्रचारम् **अकुर्वन्**।<br>iv. उद्याने सर्वत्र पुष्पाः विकसन्ति।<br>v. दशरथस्य **त्रयः** राज्ञः आसन्। | 1 x4=4 |

| | | |
|---|---|---|
| | खण्ड– 'घ'<br>पठित–अवबोधनम् (30 अङ्काः) | |
| 11. | अधोलिखितम् गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तरानि लिखत–<br>अथ एकदा भगवान् बोधिसत्त्वः बहुजन्मार्जितपुण्यफलैः शिवीनां राजा बभूव। स बाल्यात् एव वृद्धोपसेवी, विनयशीलः, शास्त्रपारंगतः च आसीत्। जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म। कारुण्य–औदार्यादिसद्गुणोपेतः स नगरस्य समन्ततः धन–धान्यसमृद्धाः दानशालाः अकारयत्। तत्र अर्थिनां समूहः अन्न–पान–वसन–रजत– सुवर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत्। राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशं आयान्ति स्म। | |
| | अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)<br>i. भगवान् बोधिसत्त्वः केषां राजा बभूव?<br>ii. राजा काः पुत्रवत् पालयति स्म?<br>iii. कः बाल्यात् एव वृद्धोपसेवी, विनयशीलः, शास्त्रपारंगतः च आसीत्? | 1 x2=2 |
| | ब. पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकम्)<br>i. अर्थिनां समूहः कानि वस्तूनि प्राप्य सन्तुष्टः अभवत्?<br>ii. राज्ञः दानशीलताम् आकर्ण्य कुतः जनाः तं देशं आयान्ति स्म? | 2 x1=2 |
| | स. प्रदत्तविकल्पेभ्यः उचितं उत्तरं चित्वा लिखत– (केवलं प्रश्नचतुष्टयम्)<br>i. असौ सर्वनाम कस्मै प्रयुक्तम्?<br>(क) राज्ञे (ख) शिवीनाम् (ग) बोधिसत्त्वाय<br>ii. 'लब्ध्वा' इत्यर्थे किं पदं गद्यांशे प्रयुक्तम्?<br>(क) समन्ततः (ख) प्राप्य (ग) आकर्ण्य<br>iii. 'तं देशं ' इत्यनयोः पदयोः विशेष्यपदं किम्?<br>(क) देशं (ख) तम् (ग) प्रमुखं<br>iv. 'संलग्नः' इति पदस्य पर्यायपदं पठिताशांत् एव चित्वा लिखत।<br>(क) रतः (ख) समन्ततः (ग) सन्तुष्टः<br>v. 'वस्तूनि प्राप्य सन्तुष्टः अभवत्।' अस्मिन् वाक्ये क्रियापदं किम्?<br>(क) वस्तूनि (ख) अभवत् (ग) सन्तुष्टः | 1/2 x4=2 |
| 12. | अधोलिखितम् पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तरानि लिखत–<br>त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत् ।<br>परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः।। | |

| | | |
|---|---|---|
| | अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)<br>i. विमूढधीः कीदृशीं वाचं त्यजति?<br>ii. कः परुषां वाचं वदति?<br>iii. विमूढधीः कीदृशीं वाचं वदति? | 1 x2=2 |
| | ब.पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्)<br>i. कः अपक्वं फलं भुङ्क्ते?<br>ii. विमूढधीः किं त्यजति किं च वदति? | 2 x1=2 |
| | स. यथानिर्देशम् उत्तरत– (केवलं प्रश्नचतुष्टयम्)<br>i. 'धर्मप्रदां वाचं' इति अनयोः पदयोः विशेषणं पदं श्लोके किं प्रयुक्तम्?<br>(क) अपक्वम् (ख) परुषाम् (ग) धर्मप्रदाम्<br>ii. 'भुङ्क्ते' इति क्रियायाः कर्तृपदं किम्?<br>(क) विमूढधीः (ख) वाचम् (ग) अभ्युदीरयेत्<br>iii. 'त्यक्त्वा' इत्यर्थे श्लोके किं पर्यायपदं प्रयुक्तम्?<br>(क) धर्मप्रदाम् (ख) परित्यज्य (ग) परुषाम्<br>iv.'पक्वम्' अस्य पदस्य विलोमपदं श्लोके किं प्रयुक्तम्?<br>(क) अपक्वम् (ख) परुषाम् (ग) फलम्<br>v. 'खादति' इत्यर्थे श्लोके किं पर्यायपदं प्रयुक्तम्?<br>(क) अभ्युदीरयेत् (ख) भुङ्क्ते (ग) त्यक्त्वा | 1/2 x4=2 |
| 13. | अधोलिखितम् नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तरानि लिखत–<br>(ततः पुत्रशोकसन्तप्ताः युधिष्ठिरः भीमः द्रौपदी च रणभूमौ प्रविशन्ति। )<br>द्रौपदी– (दीर्घं निःश्वस्य) हा हन्त! किम् इदं घोरम् आपतितम्। पापकर्मणा द्रौणिना मे पुत्राः भ्रातरः च हताः। अग्निः इव दहति माम् अयं शोकः ।<br>युधिष्ठिरः–शुभे! धैर्यं धारय। नूनं तव पुत्राः वीरगतिम् एव प्राप्ताः। वीरजननी त्वं शोचितुं न अर्हसि।<br>द्रौपदी–कथं मन्दभाग्या अहं धैर्यं धारयामि। यावत् असौ क्रूरकर्मान दण्ड्यते, तावत् अहम् इतः न गमिष्यामि, अत्रैव प्राणत्यागं च करिष्यामि ।<br>युधिष्ठिरः– प्रिये! मा एवं ब्रूयाः। स पापकर्मा कुत्र गतः, इति न जानीमः। अतिदूरं किञ्चिद् दुर्गमवनं प्रविष्टः भवेत्।<br>द्रौपदी– (भीमं प्रति) आर्यपुत्र! क्षत्रधर्मम् अनुस्मरन् मां शोकसागरात् रक्ष। अस्मिन् संसारे कश्चित् अपि त्वया सदृशः पराक्रमी नास्ति। पुरा वारणावते त्वमेव पाण्डवान् रक्षितवान्। विराट–नगरे अपि त्वं मां प्राणसंकटात उद्धृतवान् । | |

| | | |
|---|---|---|
| | अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)<br>i. द्रौपद्याः पुत्राः केन हताः?<br>ii. के वीरगतिं प्राप्ताः?<br>iii. भीमः कुत्र पाण्डवान् रक्षितवान्?<br><br>ब. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्)<br>i. कः संसारे परमपराक्रमी आसीत्?<br>ii. पुत्रशोकसन्तप्ताः कुत्र प्रविशन्ति?<br><br>स. यथानिर्देशम् उत्तरत– (केवलं प्रश्नचतुष्टयम्)<br>i. 'प्रिये' इति सम्बोधनं कस्यै प्रयुक्तम्?<br>(क.) युधिष्ठिराय (ख.) द्रौपद्यै (ग.) भीमाय<br>ii. 'धीरताम्' अस्य पदस्य कृते पर्यायपदंनाट्यांशे किं प्रयुक्तम्?<br>(क.) धैर्यम् (ख.) माम् (ग.) भीमम्<br>iii. 'पापकर्मणा द्रौणिना' इति अनयोः पदयोः विशेषणं पदं किम्?<br>(क.) पापकर्मणा (ख.) द्रौणिना(ग.) पुत्राः<br>iv.'प्रविशन्ति' इति क्रियायाः कर्तृपदं नाट्यांशे किम्?<br>(क.) युधिष्ठिरः (ख.) पुत्रशोकसन्तप्ताः (ग.) द्रौपदी<br>v. 'धारय' अस्मिन् क्रियापदे कः लकारः?<br>(क.) लृट् (ख.) लोट् (ग.) लट् | 1 x2=2<br><br><br><br><br>2 x1=2<br><br><br><br>1/2 x4=2 |
| 14. | रेखांकितपदानि आधृत्य प्रश्ननिर्माणं क्रियताम्– (केवलं प्रश्नचतुष्टयम्)<br>i. बालकाः राजपथे क्रीडन्ति स्म।<br>ii. द्रौपद्याः पुत्राः **द्रोणपुत्रेण** हताः।<br>iii. मम नृत्यं तु **प्रकृते**ः आराधना।<br>iv. सूपकाराः पाकशालायां प्रविष्टं मेषं ताडयन्ति स्म।<br>v. गुरूणाम् आज्ञा हि अविचारणीया भवति। | 1 x4=4 |
| 15. | मंजूषातः समुचितपदानि चित्वा अधोलिखित–पद्ययोः अन्वयं पूरयत–<br>(क.) चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।<br>तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।।<br>अन्वयः– कृष्ण! मनः i .............. प्रमाथि ii ................दृढं हि तस्य iii ...... .........अहं वायोः इव iv ..................... मन्ये। | 1/2 x4=2 |

| | | |
|---|---|---|
| | (ख.) य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।<br>न कुर्यादहितं कर्म स परेभ्यः कदापि च।।<br>अन्वयः– यः (i)................ श्रेयः प्रभूतानि (ii)....................च इच्छति, सः (iii)................ अहितं कर्म (iv)................ न कुर्यात्।<br>मंजूषा<br>निग्रहम्, बलवत्, कदापि, चञ्चलं, सुखानि, परेभ्यः, आत्मनः, सुदुष्करम् | 1/2 x4=2 |
| 16. | अधोलिखितानां कथनानां समुचितं भावं विकल्पेभ्यः चित्वा लिखत–<br>(केवलं प्रश्नचतुष्टयम्)<br>i. अश्वत्थामा सव्येन **<u>पाणिना</u>** चक्रं गृहीतवान्।<br>(क) हस्तेन (ख) अंगुल्या (ग) वामेन<br>ii. त्यक्त्वा धर्मप्रदां वाचं <u>परुषां</u> योऽभ्युदीरयेत्।<br>(क) कोमलाम् (ख) परेषाम् (ग) कठोराम्<br>iii. **<u>अरुणस्य</u>** प्रदेशः अरुणाचलः।<br>(क) चन्द्रस्य (ख) सूर्यस्य (ग) तारकस्य<br>iv. तस्मात् संहर **<u>दिव्यं</u>** त्वम् अस्त्रम्<br>(क) गृहाण (ख) रोधय (ग) अलौकिकम्<br>v. <u>हेयम्</u> अपि च किम्?<br>(क.) त्याज्यम् (ख.) गेयम् (ग.) योग्यम् | 1 x4=4 |